# टिळक महाराष्ट्र विद्यापीठ, पुणे

**24E NEP**

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र २ रे**

**विषयः संस्कृतभाषाकौशल–२ (24E424)**

**दिनांक :१६/०५/२०२५** **गुण : १००** **वेळ : स. १०.०० ते दु. १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणां माध्यमभाषया अनुवादं करुत।** **(१५)**

१. भारतभ्रमणसमये एकदा स्वामी विवेकानन्दमहोदयः वाराणसीं प्राप। तत्र अन्नपूर्णायाः मन्दिरं गत्वा प्रणम्य च स तां स्मरन् निवर्तमानः मार्गे किमपि विस्मयजनकमन्वभवत्। मार्गस्य एकतः आसीत् कश्चन तडागः अपरतः च उन्नता भित्तिका। तेन मार्गेण गच्छता स्वामिना ज्ञातं यत् केचन वानराः तस्य पृष्ठतः अनुगच्छन्तीति। यदा स्वामी तिष्ठति तदा तेऽपि वानराः तिष्ठन्ति यदा स चलति तदा वानराः तमनुगच्छन्तीति ज्ञातं स्वामिना। तान् मार्गाद् दूरीकर्तुं स्वामिना पदप्रहारस्याभिनयः कृतः तदा ते तं दंष्टुमधावन्। कठिनोऽयं प्रसङ्गः इति मत्वा भीतः सः त्वरया पलायितुमारभत। वानरा अपि तम् अन्वधावन्।

२. आचार्या– श्रुणु। प्रायः ख्रिस्तपूर्वं तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम् । एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः। तस्मिन् ग्रन्थे नाट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति ।
अदितिः– के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ?
आचार्या– भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति। तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः ।
अदितिः– कति रसाः ? कानि च तेषां नामानि ?
आचार्या– शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः । अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।
अदितिः– आचार्ये ! अधुना विशेषेण वीररसविषये कथयतु भवती।

३. वत्से, अत्र प्राप्ताहं भरतपुरं दिनद्वयात्पूर्वम्। रमणीयं निसर्गरूपं विविधखगैरुत्कूजितमनुभूय मनो मे न तृप्तिमायाति। त्वां चातीव स्मरामि अत्रागत्य, विशेषतः तव पक्षिप्रेम तेषां विषयकं कौतूहलञ्च। त्वया ज्ञायत एव यदेतत् 'केवलदेवराष्ट्रीयोद्यानं' पक्षिणामभयारण्यम्। तेषां कृते अत्र विशेषव्यवस्था विशेषा निर्बन्धाश्च कृताः भारतशासनेन।
एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकाराणि स्थलानि अत्र निर्मितानि। स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासमूताः महावृक्षा अपि अत्र विद्यन्ते।

४. पार्थः– हन्त, वसन्ततौ परीक्षासमय एव भारनियमनं वर्तते। ऊर्जाविपत्तिस्तु वर्धत एव प्रतिदिनम्।
अथर्वः– मया पठितम्, ननु ऊर्जा त्वक्षया। तत्कथमूर्जाविपत्तिः ?
श्रेया– सत्यम्, ऊर्जा त्वक्षया एव। परमूर्जासाधनानि तु मर्यादितान्येव। नष्टे कारणे कुतः कार्योत्पत्तिः ?
अथर्वः– परं का नाम ऊर्जा ? कानि तस्याः रूपाणि ?
श्रेया– ऊर्जा नाम कार्यशक्तिः। ऊष्मा, प्रकाशः, ध्वनिः, विद्युदादीनि बहूनि तस्याः रूपाणि।

**प्र. २ त्रयाणां माध्यमभाषया सान्वयमनुवादं करुत।** **(१५)**

१. स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशीन्नाशयति विघ्नानाम् ।।

२. घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ।।

३. अग्निः काष्ठाज्जायते मथ्यमानाद्भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति ।।

४. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।।

५. क्षारं जलं वारिमुचः पिबन्ति तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि पीत्वा च सूक्तानि समुद्गिरन्ति ।।

**प्र. ३ दश वाक्यानि संस्कृतभाषया अनुवदत।** **(१०)**

१. मी काल सुंदर चित्र पाहिले.
२. तू रोज नाचतेस का?
३. राजा तिला म्हणाला की तू लवकर ये.
४. दोन माकडे गोड फळे खाऊन उडी मारतात.
५. आम्ही वर्गात बसतो.
६. या बागेत चार मुली काम करतात.
७. आपण आजच हे काम करायला हवे.
८. दोन शिक्षिका एकाच वर्गात शिकवतात.
९. मागील वर्षी खूप पाऊस पडला
१०. जर इच्छा असेल तरच मी खाते.
११. उद्या मी गावाला जाईन.
१२. सीता आणि लक्ष्मण रामाबरोबर वनात गेले.
१३. ज्येष्ठांना नमस्कार.
१४. त्या गावातील लोक खोटे बोलत नाहीत.
१५. तुम्ही सगळे वर्गात बसलात की मी सूचना सांगेन.

**प्र.४.अ. लङ्लकारस्य क्रियापदतालिकां लिखत। (सर्वाणि रूपाणि)** **(०९)**

आ +गम् १ प. प.

**अथवा**

कथ् १० आ. प.

**आ. लृट्लकारस्य क्रियापदतालिकां लिखत । (सर्वाणि रूपाणि)** **(०९)**

स्था १ प. प.

**अथवा**

पूज् १० आ. प.

**प्र. ५. अ. द्वयोः सतिसप्तमीवाक्यरचनां कुरुत निष्कासयत वा।** **(०२)**

१. ज्ञाने सति स्पष्टता वर्धते।
२. दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव।
३. यदा सिंहः गर्जति तदा पशवः धावन्ति।

**आ. पञ्चानां वाच्यपरिवर्तनं कुरुत।** **(०५)**

१. ते प्रतिवर्षं दुर्गापूजां कुर्वन्ति।
२. बलिः पातलं गतवान्।
३. ग्रामजनाः पौर्णिमायां ग्रामे तिष्ठन्ति।
४. छात्राभिः काव्यानि पठ्यन्ते।
५. नर्तकी प्रतिदिनं नृत्यति।
६. अस्माकं सैनिकाः देशं रक्षन्ति।
७. पिता वृद्धान् बालवत् पालयति।

**इ. पञ्च रूपाणि लिखत।** **(०५)**

१. मनस् नपुं. द्वितीयाद्विवचनम्।
२. इदम् पुं. तृतीयाएकवचनम्।
३. प्र+आ+गम् १ प.प. लिङ् प्रथमपुरुषएकवचनम्।
४. नि+गद् १प.प. लङ् उत्तमपुरुषद्विवचनम्।
५. स्पृश् ६ प.प. क्त्वा अव्ययम्।
६. दा ३ उ.प. कर्मणिरूपं लट् प्रथमपुरुषएकवचनम्।

७. चिन्त् १० प.प. लिट् प्रथमपुरुषबहुवचनम्।

८. क्री ९ प.प. हेत्वर्थकमव्ययम्।

**ई. चतुरः सन्धीन् कुरुत विघटयत वा।** **(०४)**

१. नद्यस्तत्र २. भूमौ+एव ३. सन्+अच्युतः

४. पुन: + रक्षति ५. एतत् + भवेत्

**उ. त्रयाणां नामनिर्देशपूर्वकं समासविग्रहं कुरुत।** **(०६)**

१. मूषकमार्जारम् २. रूपहीनः ३. अण्डजः ४. श्रवणमननाभ्याम्

**प्र. ६ दशानां रूपाणां परिचयं लिखत।** **(१०)**

१. चतस्रः २. वस्तव्यम् ३. हतवान् ४. भविष्यामि ५. श्रुतेन

६. पयांसि ७. कुर्वती ८. प्रजल्प्य ९. पातुम् १०. करवाणि

११. मन्यमानः १२. स्थाप्यन्ते १३. अविन्दथाः १४. भवतः १५. पत्युः

**प्र. ७.अ. दश वाक्यानि सूचनानुसारं परिवर्तयत।** **(१०)**

१. वाटिकायां --- पुरुषाः तिष्ठन्ति। । (त्रि इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)

२. त्वमपि पठ। (भवत् सर्वनाम्नः कर्तृपदं योजयत।)

३. शिक्षिका वर्गे वाक्यम् ----- (ब्रू+क्त्वा) गच्छति।

४. अहं रात्रौ द्रष्टुं न शक्नोमि (बहुवचने परिवर्तयत।)

५. शोकाकुलाः जनाः प्रतिवदन्ति। (लङ् लकारे परिवर्तयत।)

६. वयं रात्रौ न पश्यामः। (द्विवचने परिवर्तयत।)

७. ----- नमः। ('वाक्य' इति पदस्य बहुवचनस्य योग्यं रूपं लिखत।)

८. महती वृष्टिः अस्ति । (लिङ् लकारे परिवर्तयत।)

९. सैनिकः सूचनां वदति गच्छति च। (पूर्वकालवाचकं योजयत।)

१०. पितामहः कथां वदति स्म।। (स्म निष्कासयत।)

११. ----- विना नदीं न तरामि। (नौका इति पदस्य योग्यं रूपं लिखत।)

१२. गणेशः गायनाय स्पृहयति । (रुच् धातोः रूपं योजयत।)

----------